श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमङ्गळश्लोकरामायणम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमङ्गळश्लोकरामायणम् ॥

सर्वलोकशरण्याय साकेतपुरवासिने।
सत्सेविताय रामाय ससीतायास्तु मङ्गलम् ॥ 1 ॥

कौसल्यायां दशरथाज्जाताय परमात्मने।
सदा भरतसौमित्रिशत्रुघ्नेशाय मङ्गलम् ॥ 2 ॥

कौशिकक्रतुरक्षार्थं कृत्वा मारीचमर्दनम्।
अहल्यापापनाशाय रघुनाथाय मङ्गलम् ॥ 3 ॥

भङ्क्त्वा शैवं पुरा चापं प्राप्य सीतामनुत्तमाम्।
अयोध्यामागतायास्तु गुणपूर्णाय मङ्गलम् ॥ 4 ॥

पितुः सत्यप्रतिज्ञायै कैकेय्या वचनादपि।
चित्रकूटनिवासाय सीतारामाय मङ्गलम् ॥ 5 ॥

पादुके भरते याते दत्त्वा राज्यस्य पालने।
दण्डकारण्यवासाय धैर्ययुक्ताय मङ्गलम् ॥ 6 ॥

हत्वा विराधं बलिनं मुनीनां भावितात्मनाम्।
दत्ताभयाय रामाय पद्माक्षायास्तु मङ्गलम् ॥ 7 ॥

चतुर्दशसहस्राणां रक्षसां क्रूरकर्मणाम्।
खरदूषणमुख्यानां हारिणेऽस्तु सुमङ्गलम् ॥ 8 ॥

सीतादर्शनयुक्ताय गृध्रमोक्षप्रकाशिने।
कबन्धहारिणे तस्मै राघवायास्तु मङ्गलम् ॥ 9 ॥

शबर्या दत्तपूजाय सेविताय हनूमता।
सुग्रीवकृतसख्याय धैर्ययुक्ताय मङ्गलम्॥ **10** ॥

वालिनं बलिनं हत्वा सुग्रीवमभिषिच्य च।
वर्षरात्रनिवासाय रामचन्द्राय मङ्गलम्॥ **11** ॥

कालातिक्रमणाच्चैव कुपिताय महात्मने।
आगते सति सुग्रीवे प्रसन्नायास्तु मङ्गलम्॥ **12** ॥

अङ्गुलीयप्रदात्रे च हनूमति महात्मने।
सीतां दृष्ट्वागते तस्मिन् हर्षयुक्ताय मङ्गलम्॥ **13** ॥

अशोकवनिकामध्ये श्रुत्वा सीतां हनूमता।
सुग्रीवकृतयानाय रघुनाथाय मङ्गलम्॥ **14** ॥

अथागतं महात्मानमभिषिच्य विभीषणम्।
कृतसागरबन्धाय सानुजायास्तु मङ्गलम्॥ **15** ॥

सेतुना सुखमासाद्य लङ्कां रावणपालिताम्।
सुवेलगिरिवासाय रणधीराय मङ्गलम्॥ **16** ॥

सुग्रीवेण दशग्रीवे मुष्टियुद्धेन मूर्च्छिते।
इन्द्रजिन्नागबद्धाय विमुक्तायास्तु मङ्गलम्॥ **17** ॥

धूम्राक्षे वायुपुत्रेण वज्रदंष्ट्रेऽङ्गदेन च।
प्रहस्ते नीलनिहते हर्षयुक्ताय मङ्गलम्॥ **18** ॥

नयत्यौषधिशैलेन्द्रं हनूमति महात्मने।
ब्रह्मास्त्रबन्धयुक्ताय विमुक्तायास्तु मङ्गलम्॥ **19** ॥

रावणिं च हतं श्रुत्वा लक्ष्मणेन महाबलम्।
निहत्य मकराक्षं च प्रसन्नायास्तु मङ्गलम्॥ **20** ॥

जित्वा रावणकोटीरं कुम्भकर्णं निहत्य च।
अतिकायं हतं श्रुत्वा प्रीतियुक्ताय मङ्गलम्॥ **21** ॥

ततो मूलबलं हत्वा रावणं च महाबलात्।
विजयं प्राप्य हृष्टाय रघुनाथाय मङ्गलम्॥ **22** ॥

ततोऽग्निवचनात् सीतां प्राप्य हृष्टां यशस्विनीम्।
ब्रह्मस्तुत्या प्रहृष्टाय रामभद्राय मङ्गलम्॥ **23** ॥

विभीषणं महात्मानं लङ्कायामभिषिच्य च।
वानरै राक्षसैः सार्धं पुष्पकस्थाय मङ्गलम्॥ **24** ॥

मदनाकृतये तस्मै मधुरापुरवासिने।
मनुवंशप्रदीपाय मानवेन्द्राय मङ्गलम्॥ **25** ॥

प्राप्यायोध्यां च भरतं गङ्गातोयैः सुगन्धिभिः।
अभिषिक्ताय रामाय ससीतायास्तु मङ्गलम्॥ **26** ॥

मधुरापुरवासाय वसुदेवसुतप्रभुः।
श्रीराममङ्गलं नित्यं शृण्वतां सुकृतं भवेत्॥ **27** ॥

एवं वाल्मीकिना प्रोक्तं रामायणकथामृतम्।
यः पठेद्रामचरितं सर्वपापैः प्रमुच्यते॥ **28** ॥

अपुत्राः पुत्रिणः सन्तु पुत्रिणः सन्तु पौत्रिणः।
अधनाः सधनाः सन्तु जीवन्तु शरदां शतम्॥ **29** ॥

॥ इति श्रीमङ्गळश्लोकरामायणं समाप्तम्॥